त्रिकञ्चुकपरित्यागान्निराख्यपदावस्थितिः ॥ ६ ॥

तीनों कञ्चुकों के परित्याग से

निराख्य पद में अवस्थिति होती है ॥६॥

त्रिकञ्चुकस्य भाविकभौतिकशून्यभेदभिन्नस्य । तत्र भाविकं शब्दाद्यहंकारपर्यन्तं तन्मात्ररूपं, भौतिकं पृथिव्यादिरूपं, शून्यं निरीहाख्यं वासनास्वरूपं च । अथवा भाविकं घटाकरं बाह्यं ग्राह्यविषयरूपं, भौतिकं पुनरान्तरमिन्द्रियात्मकं ग्रहणरूपं, शून्यं तदुभयमध्यमाकाशम् । अथवा भाविकं स्वप्नावस्था सृष्टिरुच्यते, भौतिकं जाग्रत्प्रथा स्थितिर्निगद्यते, शून्यं सुषुप्तदशा संहारोऽभिधीयते । इत्थंसंस्थितस्य त्रिकञ्चुकस्य 'परित्यागात्' संन्यासात् 'निराख्यपदावस्थितिः' निर्गता आख्या अभिधानं यस्य असौ निराख्यः अव्यपदेश्यमनुत्तरं वागुत्तीर्णं परं धाम, तस्मिन् सर्वोत्तीर्णानिकेतनपरमाकाशेऽवस्थितिः सदैव अपरिच्युतस्वभावनिष्ठा भवतीति संबन्धः ॥ ६ ॥

कञ्चुक मायात्मक आवरण है जिसके द्वारा सर्व-व्यापी असीम ब्रह्म दिक, काल तथा आकार की सीमा के अन्तर्गत संकुचित हो जाता है ।

भाविक, भौतिक, तथा शून्य नामक तीन कञ्चुक हैं। टीका-कार ने इनकी तीन प्रकार से व्याख्या की है।

प्रथम विकल्प

(१) भाविक :—शब्द, स्पर्श, रूप, रस, गन्ध, मन तथा बुद्धि अहङ्कार तन्मात्र–रूप भाविक कञ्चुक है। (२) पृथ्वी, जल, तेज, वायु, आकाश पञ्च तत्त्वात्मक भौतिक कञ्चुक है। (३) निरीह (इच्छा से परे) केवल वासना स्वरूप शून्य कञ्चुक है।

द्वितीय विकल्प

घट के आकार के समान वाह्य, इन्द्रियों द्वारा ग्राह्य विषयों का रूप भाविक, तथा (२) इन्द्रियात्मक ग्रहण रूप भौतिक कञ्चुक है (३) इन दोनों के मध्यमें स्थित आकाश रूप तीसरा शून्य कञ्चुक है।

तृतीय विकल्प

भाविक कञ्चुक स्वप्नावस्था है जो सृष्टि के नाम से कही जाती है (२) भौतिक कंचुक जाग्रदावस्था रूप स्थिति है। तथा (३) संहारात्मक सुषुप्ति–दशा शून्य कञ्चुक है।

(७) इस प्रकार संस्थित कञ्चुकों के परित्याग से निराख्य अर्थात् अभिधान से रहित, वाणी से परे, अनिर्वचनीय पद में स्वाभाविक स्थायी निष्ठा हो जाती है।

सृष्टि, स्थिति तथा लय रूप तीन कञ्चुक हैं जिनके लय हो जाने पर दिक्–काल-आकार से रहित परम शून्य आकाश में निष्ठा उत्पन्न होती है। यह तुर्य अवस्था है, जहां वाणी की पहुंच नहीं है। यह नामोपाधि से मुक्त अवस्था है।

सप्तम-सूत्र

इत्थं कञ्चुकत्रयोल्लङ्घनेन तुर्यपदप्राप्ति निरूप्य, इदानीं सर्ववाक्प्रथासु निरावरणासु स्वरभूतिविजृम्भैव प्रथते सदैव,- इति निरूपयन्ति

पूर्व सूत्र में तीनों कञ्चुकों के परित्याग से तुर्यावस्था की प्राप्ति का व्याख्यान किया गया है। अब समस्त वाक् प्रवाह में शुद्ध स्वर के विस्तार का निरूपण करते हैं।

वाक्चतुष्टयोदयविरामप्रथासु स्वरः प्रथते ॥ ७ ॥

वाक् चतुष्टय के उदय तथा विराम की
परम्परा में स्वर ही प्रवाहित होता है ॥ ७ ॥

आदौ तावत् वाक्चतुष्टयं निर्णीयते। निरावरणनिरवकाशोदयनिरुत्तरनिस्तरङ्गपरमनभसि उच्छलत्किंचिच्चलनात्मकप्रथमस्पन्दविकासस्वभावा वर्णरचनां मयूराण्डरसन्यायेन अद्वयमहासामरस्यतया अन्तर्धारयन्ती परेति प्रथिता। सैव च अनाहतनादस्वरूपतामवाप्ता निर्विभागधर्मिणी समस्तवर्णोदयं वटधानिकावदन्तर्धारयन्ती द्रष्टृस्वभावा पश्यन्तीति व्यपदेश्या। सैव च संकल्पविकल्पनिवहनिश्चयात्मबुद्धिभूमिं स्वीकृतवती वर्णपुञ्जं शिम्बिकाफलन्यायेन अन्तर्धारयन्ती मध्यमा इत्यभिहिता। सैव हृत्कण्ठतात्वादिस्थानकरणक्रमेणाहता सती वर्णविभवमयश्लोकादिवत् भेदरूपं प्रकटयन्ती रूपादिसमस्तविश्वप्रथां च व्यक्ततामापादयन्ती वैखरीत्युक्ता। इत्थं निरवकाशात् वाक्चतुष्टयमविरतमनिरोधतया प्रथते। एवमीदृक्स्वभाववाक्चतुष्टयस्य

उदयश्च विरामश्च तावुदयविरामौ सृष्टिसंहारौ, तयोः प्रथा व्यक्ताव्यक्ततया सदैव अविरतमुल्लसन्त्यः स्फुरन्त्यः, तासु 'स्वरः'अनाहतहतोत्तीर्णमहानादोल्लासविकासस्वभावः'प्रथते' सविकल्पनिर्विकल्पसंविदुत्तीर्णपरवियदुदयमेव प्रकाशितं सततमकरणप्रवृत्त्या प्रयातीत्यर्थः। इत्थं नानाभेदोल्लासप्रकाशरूपेषु वर्णनिवहोदयेषु मध्यात् प्रतिवर्णान्तरे वाक्चतुष्टयक्रमेण अखण्डितवृत्त्या स्वस्वरूपमपरित्यज्य यथामुखोपदिष्टनीत्या स्वर एव प्रथते,–इत्युक्तं भवति ॥७॥

वाक् चतुष्टय :—

प्रथम वाणी के चार भेदों का निरूपण करते हैं:—

(१) परा (२) पश्यन्ती, (३) मध्यमा (४) वैखरी नामक चार भेद वाणी के हैं।

परा :—

आवरण, अवकाश, एवं तरङ्गों से रहित परम शून्य आकाश में उच्छलनात्मक किञ्चित् सञ्चालन से प्रथम स्पन्द का आविर्भाव होता है, जो परा वाणी के नाम से सम्बोधित है।

जिस प्रकार अण्डे के श्वेत एवं पीले रस में मयूर का वर्ण वैचित्र्य अन्तर्निहित है, उसी प्रकार वर्णों के अनेक रूपों का परा वाणी के अन्तः में सामरस्यात्मक अभिन्न समावेश होता है।

पश्यन्ती :—

अनाहत-नाद स्वरूप में अवतरित वही परा वाणी दृष्टा–स्वभाव होने के कारण पश्यन्ती नाम से कही जाती है; जिसमें वट धानिका के समान समस्त वर्ण-समूह अभिन्न रूप में अन्तर्निहित होते हैं।

मध्यमा :—

संकल्प–विकल्पात्मक ज्ञान समूह जब निश्चयात्मक बुद्धि–भूमिका को प्राप्त करता है तब वही परा वाणी सेम के वीज के समाम वर्ण समूह को अपने अन्तः में धारण करती है। अर्थात् जिस प्रकार सेम की फ़ली में वीज के कणों की पृथक्-पृथक् स्थिति हो जाती है, किन्तु छिलके से आवृत होने के कारण वाहर स्पष्ट रूप से दृष्टि गोचर नहीं होते हैं; वैसे ही वर्णों के निश्चयात्मक पृथक् स्वरूप का सर्व प्रथम अन्तः में आविर्भाव होता है; किन्तु बाहर स्पष्ट दर्शन नहीं होता है। वाणी के विकास की यह अवस्था मध्यमा नाम से कही जाती है।

वैखरी :—

विकास की अन्तिम अवस्था में जव वही परा वाणी हृदय, कण्ठ, तालु आदि स्थानों अर्थात् अवयवों से आहत होकर साधन-क्रम से वर्ण-भेद को स्पष्ट प्रकट करती है, तव वह वैखरी नाम से कही जाती है। इस अवस्था में नाद का वर्णों के रूप में पूर्ण विकास हो जाता है तथा समस्त विश्व के ज्ञान-प्रवाह एवं, वेद शास्त्र आदि का अभिव्यञ्जन होता है। वैखरी रूप में वाणी तथा वर्णों के वैभव की पूर्ण अभिव्यक्ति प्रकट हो जाती है ।

इस प्रकार निरवकाश संवित् तत्व से अनवरुद्ध, अविरत चार रूपों में वाणी का प्रवाह होता रहता है।

उपर्युक्त स्वभाव से युक्त वाक-चतुष्टय के सृष्टि तथा संहारात्मक परम्परा के व्यक्त अथवा अव्यक्त स्फुरण में स्वर अर्थात् उल्लास–विकासशील अनाहतहतोत्तीर्ण-महानाद ही प्रवाहित होता है। तात्पर्य है कि सविकल्प-निर्विकल्प संवित् से परे परम आकाश किसी साधन के आश्रय के बिना स्वाभाविक रूप में प्रकाशित होता है।

इस प्रकार वाक्चतुष्टय क्रम में गुरु-मुख से नाना रूपों में प्रकटित वर्ण समूह के मध्य प्रत्येक वर्ण के अन्तर में अखण्डित–वृत्ति से मूल स्वर का ही प्रवाह होता है।

अष्टम-सूत्र

इति वाक्चतुष्टयोदयक्रमेण निरावरणस्वरोदयः सर्वत्र सर्वकालं स्फुरति,-इति निरूप्य, इदानीं रसत्रितयाभोगे सति परं धामैव निरुत्तरं चकास्ति,-इति निगद्यते

संदर्भः—

इस प्रकार वाक् चतुष्टय के उदय क्रम से सर्वत्र अनवरत निरावरण स्वर के स्फुरण का व्याख्यान कर अब रस त्रय के आभोग से पर-ब्रह्म की प्राप्ति का निरूपण करते हैं।

रसत्रियास्वादनेनानिच्छोच्छलितं
विगतबन्धं परं ब्रह्म ॥८॥

रस त्रय के आस्वादन से विगत-बन्ध
(मुक्त-स्वभाव) परब्रह्म का ही निरिच्छ
(लीलात्मक) उच्छलन (स्फुरण) होता है ॥ ८ ॥

रसत्रयं गुरुमुखोदितदृशा मनागीषत् प्रकाश्यते। मूलाधारपयोधराधारप्रथिताकृत्रिमरसत्रितयाभोगे सति 'अनिच्छोच्छलितं' निष्कामतया प्रोल्लसितं 'विगतबन्धं' विरहितभेदप्रथात्मकसंसारावग्रहं शान्तचित्रोभयविधब्रह्म-स्वरूपसमुत्तीर्णं किमपि निरुत्तरप्रकृष्टतरामर्शसंवित्स्वभावं परं ब्रह्मैव सततमनस्तमितस्थित्या विजृम्भत इत्यर्थः। एतदेव रहस्यक्रमेणोच्यते। मूलाधारस्तु प्रथमप्रतिभोल्लास-महानादविशेषः सृष्टिस्वभावः भेदाभेदात्मकसंवित्पदार्थ-प्रथमाश्रयभित्तिभूतत्वात्। पयोधरस्तु पयः समस्ताप्याय-कत्वात् सर्वाश्रयसंवित्स्वरूपं तदेव धारयति स्थितिप्ररोहमव-लम्बयति यः स्पन्द आद्योन्मेष एव सर्वपदार्थावभासनात् स्थितिरूपः। आधारस्तु जडाजडभावपदार्थोपसंहारकत्वा-

त्प्रत्यावृत्तिसंवित्स्वभावः संहारः । एतत्त्रयोद्भूतं रसरूपं तत्तदनुभवचमत्कारसामरस्यमास्वाद्य स्वात्मनि अकृतकख-मुद्रानुप्रवेशात् विमृश्य, तुर्यस्वभावो महासंहाराख्योऽनवरतं परमाद्वयतया विभातीति रहस्यार्थः ॥८॥

मूलाधार, पयोधर एवं आधार नामक तीन रस हैं; जिनका स्वाभाविक उपयोग (लय) हो जाने पर प्रयोजन रहित लीलया प्रोल्लसित भेद–ज्ञान रहित, शान्त एवं विचित्र उभय विध ब्रह्म–स्वरूप से परे स्वाभाविक परम संवित् रूप ब्रह्म ही निरन्तर प्रकाशित होता है ।

रसत्रय का पृथक् निरूपण करते हैं । प्रतिभा के प्रथम स्पन्द महानाद विशेष का नाम मूलाधार है । यह भेदा-भेदात्मक संवित् पदार्थ का आदि आश्रय होने के कारण स्वभावतः सृष्ट्यात्मक है ।

पयोधर समस्त सृष्टि का पोषक होने के कारण सब के आधार–भूत संवित् को धारण करता है । स्थिति के विकास का अवलम्बन यह प्रथम उन्मेष अर्थात् स्पन्द ही समस्त पदार्थों को प्रकाशित करने के कारण स्थिति रूप है ।

आधार नामक तृतीय रस जड़ तथा अजड़-भाव पदार्थों का संहारक होने के कारण प्रत्यावृत्ति-संवित्-स्वभावात्मक संहार है । अर्थात् सहार दशा में समस्त पदार्थों का अपने मूल स्वरूप में प्रत्यावर्तन हो जाता है । अतः संहारात्मक यह रस आधार नाम से कहा गया है । सृष्टि, स्थिति तथा लयात्मक तीनों रसों के अनु-भव के चमत्कार से आविर्भूत सामरस्य के उपभोग से साधक के अन्तः में स्वाभाविक परम शून्य अवस्था की स्थापना हो जाती है, जिसके कारण रसत्रय के स्वरूप का विमर्श रूप, तुर्य-स्वभाव महासंहार नामक परम अद्वैत रस अनवरत प्रकाशित होता है ।

तात्पर्य है कि रसत्रय के संहार से उद्भूत शून्य अवस्था में सामरस्यात्मक चतुर्थ रस की अनुभूति होती है, जो तुर्य-स्वभाव है । तुर्यावस्था में सृष्टि, स्थिति, लयात्मक प्रवाह का संहार हो जाने पर मुक्त–स्वभाव अद्वय परब्रह्म का प्रयोजन रहित लीला-त्मक उच्छलन होता है । अर्थात् देश, काल, आकार. वस्तु, उपादान, सामग्री से निरपेक्ष वस्तु-रूप से अवभासन होता है ।

नवम-सूत्र

एवं निरवकाशभङ्ग्या रसत्रितयचर्चासंप्रदायं निरूप्य, इदानीं देवीचतुष्टयकथासाक्षात्कारः प्रकाश्यते

इस प्रकार निरवकाश अनुभूति से रसत्रय का निरूपण करके इस सूत्र में देवी चतुष्टय के साक्षात्कार को प्रकाशित करते हैं।

देवीचतुष्टयोल्लासेन सदैव
स्वविश्रान्त्यवस्थितिः ॥९॥

देवी चतुष्टय के उल्लास से अनवरत आत्म-विश्रान्ति में समावेश हो जाता है ॥९॥

देवीचतुष्टयं क्षुत्तृडीर्ष्यामननरूयम्। तत्र च सर्वग्रासनिरतत्वात् क्षुदेव महासंहारः। सर्वशोषकत्वात् तृडेव संहारः। ईर्ष्या द्वयप्रथापादिका ग्राह्यग्राहकपरिग्रहग्रथिता स्थितिरूपा। मनना च संकल्पविकल्पोल्लासरूपा सृष्टिः। एतद्रूपस्य देवीचतुष्टयस्य च 'उल्लासेन' घस्मरसंवित्प्रवाहप्रवृत्त्या प्रथनेन 'सदैव' सर्वकालं प्रत्येकं चातुरात्म्येनोद्योगाभासचर्वणालंग्रासवपुषा स्वस्वरूपावस्थितिः पञ्चमपदातिशायिनी निरवकाशसंविन्निष्ठा स्थितेत्यर्थः ॥९॥

क्षुत्, तृड्, ईर्ष्या, मनना नामक चार शक्तियों को देवी चतुष्टय नाम से सम्बोधित किया गया है।

क्षुत् अर्थात् क्षुधा शक्ति समस्त पदार्थों की भक्षक होने के कारण महासंहार नाम से कही गई है।

तृड् अर्थात् तृषा शक्ति सर्व शोषक होने के कारण संहार है।

ग्राह्य-ग्राहक रूप अर्थात् इन्द्रियाँ तथा उनके विषय ईर्ष्याशक्ति हैं, जो द्वैतात्मक अनुभूति को ग्रहण करने के कारण स्थिति रूप है। ईर्ष्या अर्थात् प्रतिद्वन्द्विता से ही जगत् की स्थिति है; अत ईर्ष्या शक्ति स्थित्यात्मक है।

चतुर्थ शक्ति मनना है, जो संकल्प-विकल्प की जननी होने से सृष्टि रूप है।

इस प्रकार महासंहार, संहार, स्थिति तथा सृष्टि रूप चार शक्तियां हैं। अन्य यह चार शक्तियाँ तुर्य, सुषुप्ति, स्वप्न एवं जाग्रत् नाम से कही गई हैं।

उपर्युक्त प्रकार से संहारात्मक-संवित्-प्रवाह में अर्थात् चतुर्धा उद्योग के आभास से उद्भूत सर्वसंहारात्मक रूप में चारों शक्तियों के प्रकृष्ट प्रवर्तन के कारण साधक का आत्मस्वरूप में प्रवेश हो जाता है। अर्थात् निरवकाश परम संवित् तत्त्व में स्थायी स्थिति हो जाती है। निष्ठात्मक यह पाँचवीं अवस्था है।

दशम-सूत्र

इत्यनेन सूत्रेण देवीचतुष्टयकथाक्रमं प्रकाश्य, इदानीं द्वादशवाहचक्ररहस्यं निरूप्यते

सन्दर्भ—

देवी चतुष्टय का क्रम से सैद्धान्तिक निरूपण करने के पश्चात् द्वादश-वाह (चक्र) रहस्य का व्याख्यान करते हैं।

द्वादशवाहोदयेन महामरीचिविकासः ॥१०॥

द्वादशवाह के उदय से महामरी-
चिकाओं का विकास होता है ॥१०॥

मनःसहितं श्रोत्रादिबुद्धीन्द्रियपञ्चकं, तथा बुद्धिसहितं वागादिकर्मेन्द्रियपञ्चकम्, एतदुभयसमूहो 'द्वादशवाहः'। तस्य उल्लासः अहेतुकेन केनापि अतिविश्रृङ्खलतरधाम-निरुत्तरनिस्तरङ्गपरस्वातन्त्र्यवृत्त्या घस्मरसंवित्प्रवाहः। तेन महामरीचीनां निरावरणक्रमेण प्रत्येकस्मिन् प्रवाहे उद्योगावभासचर्वणालंग्रासविश्रान्तिरूपाणां महासंविद्रश्मीनां 'विकासः' नियतानियतचिदचित्प्रथाविगलनेन नित्यविकस्वरस्वभावो महाप्रबोधः सततमविनश्वरतया सर्वत्र सर्वतः सर्वदैव स्थित इति महावाक्यार्थः ॥१०॥

द्वादशवाह—

मन सहित श्रोत्रादि पाँच ज्ञानेन्द्रियों तथा बुद्धि सहित पाँच कर्मेन्द्रियों के समूह को द्वादशवाह के नाम से सम्बोधित किया गया है।

कारणरहित, अत्यन्त उच्छृङ्खल, निस्तरङ्ग (शान्त) परम स्वतन्त्र किसी वृत्ति के द्वारा संहारात्मक संवित् के प्रवाह को द्वादशवाह का उदय नाम से कथन किया गया है।

इस सहारात्मक-संवित् के प्रत्येक प्रवाह में अवभासित उद्योग (स्फुरण) की संहारक, विश्रान्ति रूप महामरीचिकाओं का विकास होता है। अर्थात् नियत-अनियत, चित्-अचित् द्वन्दात्मक ज्ञान-प्रवाह का अन्त हो जाने पर नित्य, विकास-शील नाद-स्वरूप महाप्रबोध का सवर्त्र, स्थायी उल्लास होने लग जाता है।

टिप्पणी—परम गुरु श्री स्वामीजी के मतानुसार प्राण, अग्नि, माया, विन्दु, अर्धचन्द्र, रोधिनी, नाद, नादान्त, शक्ति, व्यापिका, समना, उन्मना द्वादशवाह हैं जिसके परे शून्य दशा में महाप्रवोध का साक्षात्कार होता है।

एकादश-सूत्र

इत्यकरणसिद्धं सद्वैव निरावरणपदसमावेशं द्वादशवाहोदयदृशा प्रकाश्य, इदानीं चर्यापञ्चकसंप्रदायं निरूपयन्ति

संदर्भ:—

द्वादशवाह के प्रवाह के उदय से निरिन्द्रिय निरावरण संवित् पद में समावेश का निरूपण करने के पश्चात् अब चर्या पञ्चकका व्याख्यान करते हैं।

चर्यापञ्चकोदये निस्तरङ्गसमावेशः ॥११॥

चर्या पञ्चक के उदय से तरङ्ग रहित
(शान्त) तत्व में समावेश होता है ॥११॥

चर्यापञ्चकं वानाश्रितावधूतोन्मत्तसर्वभक्ष्यमहाव्यापकस्वरूपम्। तस्य उदयो नियतानियतशक्तिसमूहान्तरोदितो विकासस्वभाव उल्लासः। तस्मिन्सति 'निस्तरङ्गसमावेशः' आणव - शाक्त - शाम्भवोदयरूपसमस्तरङ्गपरिवर्जितसमावेश लक्षणनिरुत्तरसमावेशधर्मैव प्रथत इत्यर्थः। चर्यापञ्चकक्रमं च वितत्य निरूपयामि। तत्र अनाश्रिता निराधारत्वात् परमाकाशरूपा श्रोत्रसुषिरप्रदेशगमनेन स्वग्राह्यवस्तूपसंहरणाय उद्‌गता। अवधूता च अनियततया सर्वत्रविहरणदृक्शक्तिमार्गेण स्वसंहार्यस्वीकरणाय उन्मिषिता।

उन्मत्ता च विचित्तवत्स्वतन्त्रतया ग्राह्यग्राह्यसंबन्धाविवक्षया स्वविषयग्रहणाय प्रथिता। सर्वभक्ष्या भक्ष्यसंस्कारनिखिलकवलनशीला स्वसंहार्यपदार्थग्रसनाय उदिता। सर्वव्यापिका च त्वग्वृत्तिगमनिकया निखिलव्यापकत्वात् अशेषस्पर्शस्वीकरणाय उन्मिषिता; - इति चर्यापञ्चकोदयः ॥११॥

अनाश्रिता, अवधूता, उन्मत्ता, सर्वभक्ष्या, महाव्यापिका, नामक पाँच चर्याएँ हैं। नियत (नियन्त्रित) अथवा अनियत, (अनियन्त्रित) शक्ति-समूह के अन्तर में पाँच विकास शील चर्याओं का उदय होता है, जिसके कारण सर्वोत्कृष्ट समावेशात्मक धर्म की अनुभूति होती है। यह अनुभूति आणव, शाक्त तथा शाम्भव उपाय-जन्य अनुभूति की तरङ्गों से उत्कृष्ट तथा भिन्न है।

प्रत्येक चर्या के स्वरूप का पृथक निरूपण करते हैं।

(१) अनाश्रिता चर्याः—आश्रय रहित होने के कारण परम शून्य आकाश रूप है जो श्रोत्रेन्द्रिय-गत अवकाश में गमन करने के कारण अपने ग्राह्य विषय शब्द को लय करने के लिए प्रकट होती है।

(२) अवधूता चर्याः— अनियत अर्थात् अनियन्त्रित होने के कारण सर्वत्र विहरणशील दृक्-शक्ति के मार्ग से अपने अनुभूत विषय को संहार करने के लिए स्फुरित होती है।

(३) उन्मत्ता चर्याः— विक्षिप्त के समान स्वतन्त्रता से ग्राह्य ग्राहक (ज्ञाता-ज्ञेय) रूप अपने विषय को ग्रहण करने के लिए आविर्भूत होती है।

(४) सर्व-भक्ष्या चर्याः— समस्त पदार्थों की संहारक होने के कारण अपने संहार्य विषय को ग्रसने के लिए प्रकट होती है।

(५) सर्व-व्यापिका चर्या का, त्वचा-वृत्ति से निर्गमन करने के कारण समस्त स्पर्श-वृत्ति का संहार करने के लिए उदय होता है।

इस प्रकार चर्या। पञ्चक के द्वारा शब्द, स्पर्श, रूप, रस, गन्ध नामक तन्मात्राओं का संहार हो जाता है; जिसके कारण मनोगत तरङ्गों से रहित परम शून्यात्मक स्थिति का आविर्भाव होता है।

प्रत्येक इन्द्रिय-जन्य वृत्ति के कार्य की संहारक शक्ति भी उस इन्द्रिय में ही उत्पन्न होती है जो चर्या नाम से यहाँ कही गयी है।

द्वादश-सूत्र

सततसिद्धचर्याक्रमं निरूप्य, इन्दानीं निर्निकेतपरज्ञान-प्रकाशावलम्बनेन पुण्यपापनिवृत्तिकथां निरूपयन्ति ।

संदर्भः—

अनवरत सिद्ध-चर्या क्रम का पूर्व सूत्र में निपरूण करके अब दिक्-काल—आकार से अतीत परम ज्ञान के आश्रय से पाप-पुण्य से निवृत्ति-कथा का उपदेश करते हैं ।

महाबोधसमावेशात्पुण्यपापासंबन्धः ॥१२॥

महाबोध में समावेश से पुण्य तथा
पाप से मुक्ति हो जाती है । ॥२॥

'महाबोधः' च ज्ञातृज्ञानज्ञेयविकल्पसंकल्पकालुष्य-निर्मुक्तो निःशमशमानिकेतनिर्बाधमामप्रथात्मकः परतरज्ञान-स्वभावः क्रमाक्रमोत्तीर्णत्वात् महागुरुभिः साक्षात्कृतः । तस्य 'समावेशः' अकरणक्रमेण यथास्थितसंनिवेशेन त्यागस्वीकार-परिहारतः सततमच्युतवृत्त्या तद्रूपेण स्फुरणम् । तस्मात् 'महाबोधसमावेशात्' पुण्यपापयोः शुभाशुभलक्षणकर्मणोर्द्वयोः स्वगफलद्वय वितरणशीलयोः 'असंबन्धः' असंश्लेषः असंयो-गश्च अनवरतं जीवत एव वीरवरस्य अपश्चिमजन्मनः कस्यचित्सर्वकालमकृतकानुभवरसचर्वणसंतृप्तस्य भवभूमावेव

बन्धमोक्षोभयोत्तीर्णमहामुक्तिः करतलामलकवत् स्थितेत्यर्थः ॥१२॥

महाप्रबोधः—

ज्ञाता, ज्ञान, ज्ञेय तथा संकल्प-विकल्पात्मक द्वैत-ज्ञान परम्परा से मुक्त, अनस्तमित शान्ति से युक्त, दिक्-कालादि से अनवच्छिन्न सर्वत्र स्फुरित, क्रम-अक्रम साधन से रहित, स्वाभाविक, परात्पर ज्ञान-स्वभाव "महाबोध" का साक्षात्कार, परम गुरु जनों के द्वारा होता है।

समावेशः-

वस्तु के त्याग तथा स्वीकार की परम्परा से रहित, किसी साधन के बिना, स्वाभाविक रूप में अच्युत वृत्ति से ज्ञानात्मक-स्फुरण को समावेश शब्द के द्वारा अभिव्यञ्जित किया गया है। इस प्रकार लक्षित महाबोध में समावेश के कारण स्वाभाविक अनुभवरस से सतत तृप्त वीर साधक का इस पृथ्वी पर ही जीवन काल में बन्ध मोक्षात्मक द्वन्द्व से परे सहज महामुक्ति दशा में प्रवेश हो जाता है।

त्रयोदश-सूत्र

स्वस्वरूपप्राप्तिपूर्वकं पुण्यपापतिरस्कारचर्चाक्रममुक्त्वा, इदानीं स्वरसिद्धमौनकथामुद्घाटयन्ति

संदर्भ :—

स्वरूप की प्राप्ति एवं पुण्य-पाप से मुक्ति की चर्चा करके अब स्वर द्वारा सिद्ध योग का प्रतिपादन किया जाता है।

अकथनकथाबलेन महाविस्मयमुद्रा-
प्राप्त्या खस्वरता ॥ १३ ॥

अ-कथन-कथा के बल से महाविस्मय-मुद्रा की प्राप्ति के द्वारा ख-स्वरता का आविर्भाव होता है।

अकथनकथाबलं गुरुमुखोपदिष्टसंप्रदायक्रमेण मनागिह चर्च्यते। अस्य अकारस्य हतानाहतानाहतहतानाहतहतोत्तीर्णतया चतुर्धोदितरूपस्य कथनं वक्राम्नायचर्चासंनिवेशनमित्यकथनम्। तत्र हतस्तावत् कथ्यते—हृत्कण्ठताल्वादिस्थानकरणसंनिवेशैर्हतः अकारादिहकारपर्यन्तनानापदार्थावभासकः। अनाहतश्चास्वरमूलोल्लसितपरनादविस्फारस्तन्त्रीमध्यमास्वरसंकेतक आकण्ठकूपान्तादुपचारतः कृतप्रतिष्ठः। अनाहतहतश्च उभयाश्रितोन्मिषितोऽहतो विश्रान्तशष्कुलीश्रवणगोपनोद्भिन्नप्रथः श्रवणयुग्ममध्यवर्त्याकाशात् तत्त्वप्रतिबिंबतत्त्वदेहतोऽपि हतोऽनाहतहतः। अनाहतहतोत्तीर्णश्च महानिरावरणधामसमुल्लसितोऽविकल्प ईषच्चलत्तात्मक महास्पन्दप्रथमकोटिरूपः स्वरः संकोचविकासविरहात्

परमविकासरूपः अस्पर्शधर्मानुच्चार्यमहामन्त्रप्रथात्मकः। तथा च अनाहतहतोत्तीर्णो यः स श्रृङ्गाटकाकारो रौद्रीस्वभावस्तुर्यः। अनाहतहतश्च अनच्ककलात्मकवक्रसंस्थानो वामारूपः सुषुप्तः। अनाहतश्च बाहुरूपाम्बिकाशक्तिर्या आगमे निरूपिता तत्स्वरूपः स्वप्नः। हतश्चायुधाकारो ज्येष्ठास्वभावो जाग्रत्। इत्येतच्चतुष्टय-स्वभावस्य आद्यवर्णस्य कथनं पारम्पर्यमुखयुक्तिविशेषः। तस्य बलं हतादिरूपत्रयोल्लसितानाहतहतोत्तीर्णरावस्फुरत्तारूपं वीर्यं तेन 'अकथनकथाबलेन'। तत्रैवमकथनं वाक्प्रपञ्चोत्तीर्णमकथनमेव कथनं संक्रमणक्रमेण निर्निकेतस्वरूपावधानं तदेव बलम कृतकस्फारसारम्। तेन संक्रमणं च मनागिह वितन्यते। प्राणपुर्यष्टकशून्यप्रमातृनिविष्टाभिमानविगलनेन निस्तरङ्गप्रविकचचिद्धामबद्धास्पदो दैशिकवरो निःस्पन्दानन्दसुन्दर परमशून्यदृग्बलेन कार्यकरणकर्मनिरपेक्षतया यद्यत्किंचित्सर्वगतात्मस्वरूपप्रतिपत्तौ अवलोकयति तत्तत्परतरचिन्मयमेव सततं भवति,—इति नास्त्यत्र सन्देहः। तथा चान्यद्व्याख्यान्तरमाह-कथनं तावत् षड्दर्शनचतुराम्नायमेलापक्रमसमूहेषु पूजनक्रमोदितनियतानियतदेवताचक्रावलम्बनेन स्फुरति। इह पुनः पूज्यपूजकपूजनसंबन्धपरिहारेण श्रीमद्वातूलनाथादिसिद्धप्रवरवक्राम्नायदृशा सततसिद्धमहामरीचिविकास एव सर्वोत्तीर्णस्वरूपाविभिन्नः सर्वदैव सर्वत्र विराजते,—इत्यकथनकथाबलं तेन महाविस्मयप्राप्तिर्भवतीति सम्बन्धः। 'महाविस्मयः' च विगतोविनष्टाः स्मयो मितामिताहंकारदर्पः सर्वोल्लंघनवृत्या स्वरूपानुप्रवेशः। अथ च महाविस्मयः स्वपरभेदविस्मरणात् झटिति निरन्तरनिरर्गलखेचरवृत्तिसमावेशः। सैव सर्वमुद्राणां क्रोडीकरणात् 'मुद्रा' तस्या

मौनपदसमावेशमयता। तया हेतुभूतया 'खस्वरता' त्रयोदशकथाकथनसामरस्यात्मकः खस्वरस्तस्य भावः सामरस्यप्रथनं भवतीत्यर्थः। खस्वारस्तु खमपि भाव शून्यमपि स्वेन राति व्याप्नोति स्वीकरोति आदत्ते,-इति खस्वरः ॥१३॥

गुरु के द्वारा उपदिष्ट परम्परा के अनुसार अ—कथन-कथा-बल का संक्षिप्त निरूपण टीका में किया गया है। वाक्य रचना की शैली तथा विषय की जटिलता के कारण यथा शब्द अनुवाद में कठिनाई के कारण यहाँ थोड़े विस्तार से विवेचन किया जा रहा है।

अकार वर्णमाला का प्रथम अक्षर है। आगम शास्त्र की परम्परा के अनुसार इसका चार रूपों में विभाजन किया गया है। (१) हत (२) अनाहत (३) अनाहत—हत (४) अनाहत-हतोत्तीर्ण

प्रत्येक का प्रथक २ निरूपण करते हैं।

(१) हतः—

शरीर—गत हृदय, कण्ठ, तालु आदि स्थानों के साधन से नाद वर्णात्मक नाना रूपों में प्रकट होता है। मुखगत संन्निवेश के कारण यह हत नाम से कहा जाता है। अकार से हकार पर्यन्त वर्ण समूह नाना पदार्थो का अवभासक है।

(२) अनाहतः—

अकार स्वर के मूल में स्फुरित परनाद का यह विस्तृत रूप मध्यमा वाणी का द्योतक है, जिसका उदय कण्ठ से लेकर नाभि पर्यन्त होता है, इसका उच्चारण केवल आन्तरिक होता है, मुख से वाहिर नहीं। अतएव उपचार से स्वर के इस स्वरूप को अनाहत नाद कहा जाता है।

(३) अनाहत-हतः— नाद के दो रूप अनाहत एवं हत पर आधारित होने के कारण यह अनाहत-हत नाम से कहा जाता है। यह कण्ठ आदि साधनों से आहत न होने के कारण अनाहत है। इसकी अनुभूति कर्ण के विवरों को बन्द कर लेने पर होती है। किन्तु श्रवण के मध्यवर्ती आकाश में सञ्चार होने के कारण यह कर्णगत देह को भी स्पर्श करता है, अतः इसको आहत भी कह सकते हैं। अतएव यह दोनों साधनों की सहायता से स्फुरित होने के कारण अनाहत-हत नाम से कहा जाता है।

(४) अनाहत-हतो-त्तीर्ण—नाद का स्फुरण महाशून्य परम आकाश में होता है। विकल्प ज्ञान से रहित किञ्चित् सञ्चलनात्मक यह महास्पन्द प्रथम भासित स्वर है। संकोच एवं विकासात्मक परिवर्तनों से रहित होने के कारण यह परम विकास रूप है। तथा साधन रूप कण्ठ आदि स्थानों के स्पर्श से रहित होने से अ-स्पर्श धर्म से युक्त, अनुच्चरित अहं-आत्मक महामन्त्र के प्रवाह का स्फुरण अनाहत-हतोत्तीर्ण स्वर है।

शृङ्गाटक के समान त्रिकोणाकार रौद्री-स्वभाव अनाहत-हतोत्तीर्ण स्वर तुर्यावस्था है।

अकार रहित स्पर्श वर्णों से अभिव्यञ्जित वामा रूप अनाहत-हत नाद सुषुप्ति है।

आगम में बाहु रूप से निरूपित अम्बिका शक्ति का स्वरूप अनाहत नाद स्वप्नावस्था है।

आयुधाकार ज्येष्ठा स्वभाव हत-स्वर जाग्रत् अवस्था है।

उपर्युक्त प्रकार से चतुर्धा विभाजित अकार के कथन से तात्पर्य परम्परागत गुरु-मुख से प्रतिपादित सैद्धान्तिक युक्ति विशेष है। जिसके द्वारा हत, अनाहत, अनाहत-हत तीन रूपों में स्फुरित

अनाहत–हतोत्तीर्ण नाद के स्फुरणात्मक सामर्थ्य का साक्षात्कार होता है।

इस प्रकार अकथन से तात्पर्य है वाणी से परे अकार का कथन। अर्थात् क्रम से दिक्-काल आदि से अनवच्छिन्न स्वरूप में तादात्म्य अर्थात् स्वाभाविक स्फुरण का सार जिस को बल नाम से कहा गया है।

नाद से तादात्म्य के प्रभाव से प्राण, पुर्यष्टक तथा शून्य–प्रमाता-गत अभिमान (आस्था) के पूर्ण रूप से नष्ट हो जाने के कारण शान्त, निस्तरङ्ग-प्रकाशित, चित् स्वरूप में समाविष्ट पूज्य गुरु, निश्चल आनन्द से सुशोभित, परम शून्य में समाविष्ट दृष्टि के बल से, कार्य–करण–कर्म से निरपेक्ष सर्व-व्यापी स्वरूप की अनुभूति के समय जो कुछ अवलोकन करते हैं, वह सब शाश्वत चित् रूप है।

टीकाकार ने इसकी विकल्प से भी व्याख्या की है। चारों वेद, षड्–दर्शन आदि के समन्वय से प्रतिपादित अन्य मतों के अन्तर्गत विहित पूजा परम्परा में आवश्यक रूप में अथवा अन्यथा निर्दिष्ट देवता चक्र के आलम्बन से नाद–स्वरूप के स्फुरण का प्रतिपादन किया गया है। अतः 'कथन' शब्द से यह अर्थ भी कहा जा सकता है। किन्तु श्रीमत् वातूलनाथ आदि सिद्ध जनों के मतानुसार पूज्य-पूजक–पूजन–सम्बन्ध से रहित निरालम्ब अर्थात् ज्ञाता, ज्ञान, ज्ञेयात्मक त्रिपुटी से परे तादात्म्य अवस्था में महामरीचि रूप संवित् का अभेदात्मक विकास निरन्तर होता रहता है।

इस प्रकार प्रतिपादित अ-कथन कथा के बल से अर्थात् अनाहत–हतोत्तीर्ण अकार के तादात्म्य से महाविस्मय मुद्रा के द्वारा शून्य आकाश में स्वर की अनुभूति होती है।

शेष प्रत्येक पारिभाषिक शब्द का टीकाकार के अनुसार अर्थ आगे लिखा जाता है:—

महाविस्मय = स्मय का अर्थ है अहङ्कार, विगत का अर्थ है— विनष्ट, अर्थात् अहङ्कार के पूर्णतया नष्ट होने पर सर्वोल्लङ्घन वृत्ति के द्वारा स्वरूप में प्रवेश अथवा स्व तथा पर भाव-भेद के विनाश से खेचरी–वृत्ति में समावेश ।

मुद्रा = समस्त मुद्राओं अर्थात् अवस्थाओं का महा विस्मय में विलय हो जाता है अतः इसको मुद्रा नाम से कहा गया है, जिसके द्वारा वाणी के विलास से परे शान्त अवस्था में प्रवेश होता है। इसी को मौन पद नाम से संकेत किया है। मुनेः भावः मौनः अथात् योग की चरम अवस्था ।

खस्वरता = खं अर्थात् भाव-शून्य आकाश भी स्व (आत्म) भाव से व्याप्त हो जाता है; खमपि स्वेन राति ।

इस प्रकार—अनाहत–हतोत्तीर्ण अकार के तादात्म्य साक्षात्कार के प्रभाव से निरहङ्कार अवस्था की प्राप्ति होने पर प्राण तथा अपान के निरोध से उद्भूत आकाशरूप परम शून्य स्थिति में त्रयोदश सूत्रों में उपदिष्ट सामरस्यात्मक नाद-ब्रह्म की अनुभूति होती है ।।१३।।

षड्दर्शनचातुराम्नायिकसर्वमेलापकथात्रयोदशकथासाक्षात्कारोपदेशभङ्ग्यानुत्तरपदाद्वयतया कस्यचिदवधूतस्य पीठेश्वरीभिर्महामेलापसमये सूत्रोपनिबद्धो वक्राम्नायः प्रकाशितः। तस्यैवेह मनाक् सतामवबोधार्थमस्माभिर्वृत्तिरियं कृता इति शिवम् ।

किसी समय पीठेश्वरों के सम्मेलन में किन्हीं अज्ञात-नाम सिद्ध अवधूत ने षड्-दर्शन तथा चारों वेदों के समन्वय से त्रयोदश कथाओं में उपदिष्ट, प्रत्यक्ष अनुभूत सर्वोत्कृष्ट, अद्वैत, मुखागत परम्परा की सूत्र-वद्ध रचना की। श्रीमद् अनन्तशक्ति पाद ने सत्पुरुषों के प्रबोध के लिए उसी निवन्ध की वृत्ति की रचना की है ।

इति परमरहस्यं वाग्विकल्पौघमुक्तं
भवविभवविभागभ्रान्तिमुक्तेन सम्यक् ।
कृतमनुपममुच्चैः केनचिच्चिद्विकासा-
दकलितपरसत्तासाहसोल्लासवृत्त्या ॥

चित् तत्त्व के कारण अकलित अर्थात् कला रूप में अपरि-वर्तित परम तत्त्व साहस से स्फुरित-वृत्ति से, जगत् के नानात्मक भेद-भ्रम से मुक्त किसी सिद्ध ने वाणी के विकल्प से मुक्त अनुपम परम रहस्य को पूर्ण रूप से प्रकाशित किया है ।

समाप्तेयं श्रीमद्वातूलनाथसूत्रवृत्तिः ।
कृतिः श्रीमदनन्तशक्तिपादानाम् ।

शुद्धि पत्रम्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
३	२०	सारस	साहस
४	४	शक्तिपात्	शक्तिपात
६	४	उक्तिभङ्ग्या	उक्ति भङ्ग्या
६	१२	आत्मा स्वरूप	आत्म स्वरूप
६	२१	भा	याभा
७	२	उक्ति भङ्ग्या	उक्ति भङ्ग्या
८	१०	गन्थि	गृन्थि
१०	६	श्रोत	श्रोत्र
११	२	उद्वेलित	उद्वेजित
११	२४	हो	दो
१४	१	षष्ठम्	षष्ठ
१४	११	घटाकरं	घटाकारं
१४	१४	सुषुप्त दशा	सुषुप्ति दशा
१५	७	इच्जा	इच्छा
१६	१	सप्तम्	सप्तम
१६	२२	मीदृवस्व	मीदृक्स्व
१८	४	समाम	समान
१९	८	रसत्रिया	रसत्रया
२१	१०	मननख्यम्	मननाख्यम्
२४	१२	सवर्त्रं	सर्वत्र
२५	२	सद्रैव	सदैव